# বিষ্ণু সূক্তম

ওং বিষ্ণোর্নুকং’ বীর্যা’ণি প্রবো’চং য়ঃ পার্থি’বানি বিমমে রাজাগং’সি য়ো অস্ক’ভায়দুত্ত’রগ্ম সধস্থং’ বিচক্রমাণস্ত্রেধোরু’গায়ো বিষ্ণো’ররাট’মসি বিষ্ণো’ঃ পৃষ্ঠম’সি বিষ্ণোঃ শ্নপ্ত্রে’স্থো বিষ্ণোস্স্যূর’সি বিষ্ণো’ধ্রুবম’সি বৈষ্ণবম’সি বিষ্ণ’বে ত্বা ॥

তদ’স্য় প্রিয়মভিপাথো’ অশ্য়াম । নরো য়ত্র’ দেবয়বো মদ’ন্তি । উরুক্রমস্য় স হি বন্ধু’রিত্থা । বিষ্ণো’’ পদে প’রমে মধ্ব উথ্সঃ’ । প্রতদ্বিষ্ণু’স্স্তবতে বীর্যা’য় । মৃগো ন ভীমঃ কু’চরো গি’রিষ্ঠাঃ । য়স্যোরুষু’ ত্রিষু বিক্রম’ণেষু । অধি’ক্ষয়ন্তি ভুব’নানি বিশ্বা’’ । পরো মাত্র’য়া তনুবা’ বৃধান । ন তে’ মহিত্বমন্ব’শ্নুবন্তি ॥

উভে তে’ বিদ্মা রজ’সী পৃথিব্য়া বিষ্ণো’ দেবত্বম । পরমস্য়’ বিৎসে । বিচ’ক্রমে পৃথিবীমেষ এতাম । ক্ষেত্রা’য় বিষ্ণুর্মনু’ষে দশস্য়ন । ধ্রুবাসো’ অস্য় কীরয়ো জনা’সঃ । ঊরুক্ষিতিগ্ম সুজনি’মাচকার । ত্রির্দেবঃ পৃ’থিবীমেষ এতাম । বিচ’ক্রমে শতর্চ’সং মহিত্বা । প্রবিষ্ণু’রস্তু তবসস্তবী’য়ান । ত্বেষগ্ম হয়’স্য় স্থবি’রস্য় নাম’ ॥

অতো’ দেবা অ’বংতু নো য়তো বিষ্ণু’র্বিচক্রমে । পৃথিব্য়াঃ সপ্তধাম’ভিঃ । ইদং বিষ্ণুর্বিচ’ক্রমে ত্রেধা নিদ’ধে পদম । সমূ’ঢমস্য় পাগ্ম সুরে ॥ ত্রীণি’ পদা বিচ’ক্রমে বিষ্ণু’র্গোপা অদা’’ভ্যঃ । ততো ধর্মা’ণি ধারয়ন’ । বিষ্ণোঃ কর্মা’ণি পশ্য়ত য়তো’’ ব্রতানি’ পস্পৃশে । ইন্দ্র’স্য় য়ুজ্যঃ সখা’ ॥

তদ্বিষ্ণো’ঃ পরমং পদগ্ম সদা’ পশ্য়ন্তি সূরয়ঃ’ । দিবীব চক্ষুরাত’তম । তদ্বিপ্রা’সো বিপন্যবো’ জাগৃবাগ্ম সস্সমি’ন্ধতে । বিষ্ণোর্য়ত্প’রমং পদম । পর্যা’প্ত্য়া অন’ন্তরায়ায় সর্ব’স্তোমোঽতি রাত্র উ’ত্তম মহ’র্ভবতি সর্বস্য়াপ্ত্যৈ সর্ব’স্য় জিত্ত্যৈ সর্ব’মেব তেনা’প্নোতি সর্বং’ জয়তি ॥

ওং শাংতিঃ শাংতিঃ শাংতিঃ’ ॥